**25E/24E**
**100 Marks**

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत पारंगत (एम.ए.) बहि:स्थ**

**परीक्षा: मे – २०२६**

**सत्र २ रे**

**विषय: किरातार्जुनीय (25E-24E-3202)**

---

**दिनांक: २१/०५/२०२६** **गुण : १००** **वेळ : स. १०.०० ते १.००**

---

**सूचना: १) उजवीकडील अंक त्या प्रश्नांचे गुण दर्शवितात. २) सर्व प्रश्न सोडवणे अनिवार्य.**

**प्र. १. पञ्चश्लोकानां सान्वयम् अनुवादं कुरुत।** (३०)

१. निसर्गदुर्बोधमबोधविक्लवा: क्व भूपतीनां चरितं क्व जन्तव:।
तवानुभावोऽयमवेदि यन्मया निगूढतत्त्वं नयवर्त्म विद्विषाम्।।

२. नित्ययं साम न दानवर्जितम् न भूरि दानं विरहय्य सत्क्रियाम्।
प्रवर्तते तस्य विशेषशालिनी गुणानुरोधेन विना न सत्क्रिया।।

३. भवन्तमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेव वर्त्मनि।
कथं न मन्युर्ज्वलयत्युदीरित: शमीतरुं शुष्कमिवाग्निरुच्छिख:।।

४. विधिसमयनियोगाद्दीप्तिसंहारजिह्मं शिथिलवसुमगाधे मग्नमापत्पयोधौ।
रिपुतिमिरमुदस्योदीयमानं दिनादौ दिनकृतमिव लक्ष्मीस्त्वां समभ्येतु भूय:।।

५. इयमिष्टगुणाय रोचतां रुचिरार्था भवतेऽपि भारती। ननु वक्तृविशेषनि:स्पृहा गुणगृह्या वचने विपश्चित:।।

६. अभिमानवतो मनस्विन: प्रियमुच्चै: पदमारुरुक्षत:। विनिपातनिवर्तनक्षमं मतमालम्बनमात्मपौरुषम्।।

७. ज्वलतस्तव जातवेदस: सततं वैरिकृतस्य चेतसि। विदधातु शमं शिवेतरा रिपुनारीनयनाम्बुसन्तति:।।

८. व्यक्तोदितस्मितमयूखविभासितोष्ठस्तिष्ठन्मुनेरभिमुखं स विकीर्णधाम्न:।
तन्वन्तमिद्धमभितो गुरुमंशुजालं लक्ष्मीमुवाह सकलस्य शशाङ्कमूर्ते:।।

**प्र. २. सविस्तरं लिखत। (केवलं द्वे)** (३०)

१. भारवे: कालमैतिह्यं च लिखत।

२. ‘मनस्विनी द्रौपदी’ इति विषयमधिकृत्य निबन्धो लेख्य:।

३. किरातार्जुनीयनस्य द्वितीयसर्गस्य रसग्रहणं कुरुत।

**प्र. ३. ससंदर्भ स्पष्टीकुरुत (केवलं ४)** (२०)

| | |
|---|---|
| विचित्ररूपा: खलु चित्तवृत्तय:। | विपदन्ता ह्यविनीतसंपद:। |
| स्फुटता न पदैरपाकृता न च स्वीकृतमर्थगौरवम्। | कथमेत्य मतिविपर्ययं करिणी पङ्कमिवावसीदति |
| न तितिक्षासममस्ति साधनम्। | हितं मनोहारि च दुर्लभं वच:। |

**प्र.४. टिप्पण्यौ लिखत ।** (१०)

| | |
|---|---|
| १. चतस्र: विद्याः | २. युधिष्ठिर: |
| ३. अदेवमातृका | ४. द्रुपदः |

**प्र. ५. अ) सनामसमासविग्रहं कुरुत। (केवलं ५)** (०५)

| | | | |
|---|---|---|---|
| रिपुनार्य: | अवितृप्तम् | समवृत्ति: | नयनर्त्म: |
| निगूढतत्त्वम् | किंप्रभु: | सौष्ठवौदार्ये | वनेचर: |

**आ) रूपपरिचयं लिखत। (केवलं ५)** (०५)

| | | | |
|---|---|---|---|
| हन्ति | जुहुधि | धिया | वपु: |
| निर्धूय | श्रिय: | संयति | दधत: |

------------